मेकोद्दिष्टं विधीयते। अपुत्राणां च सर्व्वेषामपत्नीनां तथैव च”। अपत्नीनां ब्रह्मचर्य्यादीनाम्। मार्कण्डेयपुराणे “प्रतिसंवत्सरं कार्य्यमेकोद्दिष्टं नरैः स्त्रियाः। मृताहनि यथान्यायं नृणां यद्वदिहोदितम्”। नृणामिति दृष्टान्तात् गोविप्रहतपाषण्ड्यादीनां सपिण्डनाभावेऽपि सांवत्सरमेकोद्दिष्टं कार्य्यमेवेति शूलपाणिः। चतुर्व्विंशतिमते “सपिण्डीकरणादूर्द्ध्वं यत्र यत्र प्रदीयते। भ्रात्रे भगिन्यै पुत्राय स्वामिने मातुलाय च। पितृव्यगुरवे श्राद्धमेकोद्दिष्टं न पार्व्वणम्”। यत्तु जातूकर्ण्यः “पितृव्यभ्रातृमातॄणामपुत्राणां तथैव च। मातामहस्याप्यपुत्रस्य श्राद्धादि पितृवद्भवेत्” इति तदावश्यकत्वार्थं न तु पार्व्वणार्थमिति हेमाद्रिः। युक्तन्त्वेवम् “मातुः पितरमारभ्य त्रयो मातामहाः स्मृताः। तेषां तु पितृवच्छ्राद्धं कुर्य्युर्द्दुहितृसूनवः” इति पुलस्त्योक्तेः मातामहस्य पार्व्वणमेव तत्साहचर्य्यात् पितृव्यादौ तथा “पितृव्यभ्रातृमातॄणामेकोद्दिष्टं च पार्व्वणमिति” च्यवनोपक्रमे पुलस्त्योक्तेश्च विकल्पः। केचित्त्वापस्तम्बादिवाक्यानि “व्युत्क्रमाच्च प्रमीतानां नैव कार्य्या सपिण्डता” इत्यस्य पितृव्यादिपरत्वादकृतसपिण्डनपितृव्यादिपराणीत्याहुः। माता सपत्नीमाता। एकोद्दिष्टं तु कनिष्टपरमिति पृथ्वीचन्द्रोदयेऽप्येवम्। विशेषस्त्वधिकारिनिर्णये प्रागुक्तः। केचित्पुत्राभावेऽपि पितामहवार्षिकमप्यावश्यकम् “पुत्राभावे च तत्पुत्रः पत्नी माता तथा पिता। वित्ताभावेऽपि सच्छिष्यः कुर्य्यात्तस्यौर्द्ध्वदैहिकम्” इति मार्कण्डेयपुराणादित्याहुस्तन्न “पौत्रेणैकादशाहादि कर्त्तव्यं श्राद्धषोड़शमिति” कातीये विशेषोक्तेः।

प्रेतपक्षे श्राद्धकालादिनिरूपणम् श्रा॰वि॰ यथा ब्रह्मपुराणे “अश्वयुक्कृष्णपक्षे तु श्राद्धं कुर्य्याद्दिने दिने। त्रिभागहीनं पक्षं वा त्रिभागं त्वर्द्धमेव वा। न सन्ति पितरश्चेति कृत्वा मनसि यो नरः। श्राद्धं न कुरुते तत्र तस्य रक्तं पिबन्ति ते। यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः। तावत् श्राद्धस्य कालः स्याच्छून्यं प्रेतपुरं तदा”। दिने दिने इति वीप्सा पक्षश्राद्धार्था तेन पञ्चदश श्राद्धानि दर्शितानि। ननु तिथिह्रासादेकस्मिन्नेव पक्षे चतुर्द्दशत्वादह्नां चतुर्द्दश श्राद्धानि प्राप्नुवन्ति। एवं तिथिवृद्ध्याहर्व्वृद्धौ षोड़श स्युः। न पञ्चदश तिथ्यात्मकत्वाच्चान्द्रपक्षस्य दिने दिने पञ्चदशतिथिष्वित्यर्थः तथा च एकस्मिन् दिने श्राद्धयोग्यतिथिद्वयलाभे श्राद्धद्वयम् अहोरात्रवृद्धौ न श्राद्धवृद्धिः। तथा च विष्णुधर्म्मोत्तरप्रथमकाण्डम् “तिथिनैकेन दिवसश्चान्द्रमानेन कीर्त्तितः। अहोरात्रेण चैकेन सावनो दिवसः स्मृतः”। त्रिभागहीनं पक्षं वा इति षष्ठ्यादिकल्प उक्तः त्रिभागमित्येकादश्यादिकल्प उक्तः अर्द्धमेवेति त्रयोदश्यादिकल्पः। न तु अर्द्धमिति पश्चार्द्धमिति व्याख्यानं कल्पतरूक्तं युक्तम् उत्तरोत्तरलघुकालोपदेशात् सन्निधानाच्च त्रिभागार्द्धप्रतीतेः। त्रिभागहीनत्रिभागपदयोरपि पञ्चम्यादिविवेचनं कल्पतरोर्न युक्तमेव पक्षापेक्षया पञ्चम्यादेस्त्रिभागहीनादिपदार्थत्वानुपपत्तेरमुख्यत्वात्। गौतमोक्तपञ्चम्यादिकल्पस्य सामान्योपक्रमाच्चाश्वयुक्परत्वम्। अतएव विष्णुधर्म्मोत्तरप्रथमकाण्डम् “उत्तरादयनात् श्राद्धे श्रेष्ठं स्याद्दक्षिणायनम्। चातुर्म्मास्यञ्च तत्रापि प्रसुप्ते केशवे हितम्। पौष्ठपद्याः परः पक्षस्तत्रापि च विशेषतः। पञ्चम्यूर्द्ध्वञ्च तत्रापि दशम्यूर्द्ध्वमतोऽप्यति। मघायुक्ता च तत्रापि शस्ता राजंस्त्रयोदशी”। पञ्चम्यूर्द्ध्वं दशम्यूर्द्ध्वमित्यनेन षष्ठ्याद्येकादश्यादिकल्पावुक्तौ। न सन्तीत्यनेनाकरणे प्रत्यवायदर्शनं नित्यत्वज्ञापनार्थं तत्र च पक्षश्राद्धादिकल्पानां विषमशिष्टत्वेनेच्छाविकल्पाऽसम्भवादेकादेया तिस्रो देयाः षड्देया इतिवत् फलभूमा कल्पनीयः। एतेषामेव कल्पानां दर्शितत्वादाश्विने कृष्णपक्षे एकस्मिन्नपि दिने श्राद्धं कर्त्तव्यमिति पक्षश्चिन्तनीयः सामान्यमासविहितन्तु स्यादेव। अत्र संशयः प्रौष्ठपद्यूर्द्ध्वं यः कृष्णपक्षः स पौर्णमास्यन्तमासव्यवस्थयाऽश्वयुक्कृष्णपक्षो भवति स यदा कन्योपक्रमः कन्यासमाप्यश्च तदा तत्र पक्षश्राद्धमविवादमेव यदा सिंहोपक्रमः कन्यासमाप्यश्च समस्त एव वा सिंहसमाप्यः तदा कीदृशः शास्त्रार्थः। अत्र त्रिकनप्रभृतयः ब्रह्मपुराणादिवचनैरेवात्र व्यवस्थां दृष्ट्वाप्याहुः। यथा ब्रह्मपुराणम् “यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः। तावत् श्राद्धस्य कालः स्यात् शून्यं प्रेतपुरं तदा”। तथा भविष्यपुराणे “कन्यां गते सवितरि पितृराजानुशासनात्। तावत् प्रेतपुरी शून्या यावद्वृश्चिकदर्शनम्। ततो वृश्चिक आयाते निराशाः पितरो नृप!। पुनः स्वभवनं यान्ति शापं दत्त्वा सुदारुणम्। हंसे वर्षासु कन्यास्थे शाकेनापि गृहे वसन्। पञ्चम्या उत्तरे दद्यादुभयोर्व्वंशयोर्ह्नृणम्। सूर्य्ये कन्यास्थिते श्राद्धं यो न कुर्य्याद्गृहाश्रमी। कुतस्तस्य धनं